# 2020

## SANSKRIT — GENERAL

**Paper : DSE-A-2**

**(Indian Perspectives in Personality Development)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Day 2**

**Section - B**

**(Marks : 30)**

**1.** अधोनिर्दिष्टेषु **कस्यचिदेकस्य** उत्तरं संस्कृतभाषया देवनागरीलिप्या च लेखनीयम्। 10×1

(a) पाण्डवैः सह कौरवाणां समरः कुत्र संघटितः? उभयपक्षीयाणां सैन्यानां वर्णनं विधाय अर्जुनस्य विषादकारणं गीतायाः प्रथमाध्यायमवलम्ब्य आलोच्यताम्। 1+5+4

(b) श्रीमद्भगवद्गीतायाः त्रयोदशाध्याये वर्णितं प्रकृतिपुरुषयोः कीदृशं तत्त्वं विज्ञाय जनानां पुनर्जन्म न भवति इति विव्रियताम्। 10

(c) जीवात्मनः स्वरूपं विवृत्य कथं तस्य उत्क्रमणं भवतीति गीतायाः पञ्चदशाध्यायानुसारेण विचार्यताम्। 2+8

**2.** अधोलिखितेषु **पञ्च** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5

(a) "आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्"— अत्र "आचार्य"-पदेन को बोधितः? कः च राजा?

(b) श्रीकृष्णस्य शङ्खस्य नाम किम्?

(c) अर्जुनस्य रथवाहकानाम् अश्वानां वर्णः कीदृशः आसीत्?

(d) जीवात्मनः उत्क्रमणं केन द्रष्टुं शक्यते?

(e) "गृहीत्वैतानि संयाति"— अत्र "एतानि"-पदेन कानि बोधितानि?

(f) कः पुरुषोत्तमरूपेण लोके वेदे च प्रथितः?

(g) धनञ्जयः कः? तस्य शङ्खस्य नाम किम्?

**3.** अधोलिखितेषु **द्वयोः** श्लोकयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×2

(a) इदं शरीरं कौन्तेय क्षेत्रमित्यभिधयते।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।।

(b) ममैवांशो जीवलोके जीवभूतः सनातनः।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।।

(c) द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।

(d) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय।।

## Section - C

**(Marks : 15)**

**4.** अधोलिखितेषु **द्वयोः** टीका कार्या। 4×2

(a) गुणत्रयम्

(b) स्वभावत्रयम्

(c) राजसं दानम्

(d) सात्त्विकी तपस्या।

**5.** अधोलिखितेषु **कस्यचिदेकस्य** व्याख्या कार्या। 7×1

(a) सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारतः।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः।।

(b) रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निवध्नाति कौन्तेय! कर्मसङ्गेन देहिनम्।।

(c) अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागवलान्विताः।।

## Section - D

**(Marks : 20)**

**6.** अधोलिखितेषु **द्वयोः** प्रश्नयोः उत्तरं प्रदातव्यम्। 5×2

(a) श्रीमद्भगवद्गीतायाः अष्टादशाध्यायमनुसृत्य ब्राह्मणस्य क्षत्रियस्य च स्वभावजानि कर्माणि लिख्यन्ताम्। 2½+2½

(b) इन्द्रियाणि कथं मनः हरन्ति? तत्र इप न्द्रियसंयमोपायः आलोच्यताम्। 2+3

(c) "योगक्षेमं वहाम्यहम्"— कोऽत्र वक्ता? उक्तेरस्याः किं तात्पर्यम्? 1+4

(d) "तमाहुः पण्डितं बुधाः"— विवुधानां मतानुसारेण के पण्डिता भवितुमर्हन्ति इति आलोच्यताम्। 5

**7.** निम्नलिखितेषु श्लोक**द्वयस्य** वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। 5×2

(a) रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैः विधेयात्मा प्रसादमधिगच्छति।।

(b) इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।।

(c) यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।।

(d) न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः।
माययापहृतज्ञाना आसुरं भावमाश्रिताः।।

———————